नं० १०४१-घ

योगचिन्तामणिः सटीकः (योगशास्त्रम्)

पत्राणि ३ (सम्पूर्णम्)

नं० १०४१-घ

३ पत्रे

कर्त्ता दुर्गादास वाचस्पतिः

श्रीगणेशायनमः ॐब्रह्मरंध्रेति अहंद्वादशारसरसीरुहं भजे सेवे इत्यर्थः।
क्रियया कर्त्तृरूपस्थितिः द्वादशारं हंसरवप्रोसहलक्ष्मलयद् इति द्वादशा
क्षरविशिष्टं द्वादशपत्रं तत्र ब्रह्मरंध्रसरसीरुहोदरे ब्रह्मरंध्रे त्रिकोणच
क्रं कर्णिकामध्यस्थे विसर्गस्थानं बिंदुनिलयं तद्विशिष्टं सरसीरुहं अधो
मुखं सहस्रदलपद्मं तदुदरे तत्कर्णिकावस्थितत्रिकोणाभ्यंतरे नित्यलग्नं सर्वदा
वस्थितं तत्पुनः किंभूतं [illegible] अवदातं शुक्लं पुनः किंभूतं अद्भुतं आ
श्चर्यं ज्योतिर्मयत्वात् पुनः किंभूतं कुंडलीविवरकांडमंडितं अधोमुखचतुर्दल

ॐब्रह्मरंध्रसरसीरुहोदरे नित्यलग्नमवदातमद्भुतं कुं
डलीविवरकांडमंडितं द्वादशारसरसीरुहं भजे १ ॥

मूलाधारपद्मकर्णिकामध्यस्थाधोमुखरंध्रनिवारवत् स्वयंभूलिंगस्थवामभ
वबीजमृणालतं(विवरं)पमद्विमुखसर्पाकारविश्वजननीशक्तिस्तेनमंडितंभूषितमित्य
र्थः शक्तिः कुंडलिनीतियानिगदिता परमार्थरूपेति नागभट्टः मेद्रदेशादूसि
रसिगता इतियोगचिंतामणौ विवरं ब्रह्मरंध्रगमनपथरूपं छिद्रं तस्य कांडं मृ
णालरूपं दंडं वज्राभिधं तस्य बाह्यमुखं श्वासोच्छ्वासविभजनार्थं अधोवक्त्र
किंजल्क पुंजमूलपद्मं तन्मध्ये परिभावयेत् बिसतालतंतूपमेयाकृतिमिति
नागभट्टः १॥

१ तस्येति अहं अबलालयं भजेत् अबलाकामकला तस्या आलयं त्रिकोणपीठमित्य
र्थः कुत्र तस्य कंदलितकर्णिकापुटे तस्य द्वादशदलपद्मं कंदलं कदंमलं लातिअ
नुगृह्णाति तद्विशिष्टायाः कर्णिकायाः पुटे संपुटे कंदलितमिति तारकादित्वादि
तः किंभूतं अकथादि त्रिरेखायाल्कृप्त याकॢप्तरेखे अकारादिषोडशाक्षरेण
ककारादिषोडशाक्षरेण थकारादिषोडशाक्षरेण रेखाकारेण कॢप्ता रेखाया
यस्य त्रिकोणस्य पुनः किंभूतं कोणलक्षितहलक्ष मंडलीभावलक्ष्यं कोण

तस्य कंदलितकंदलितकर्णिकापुटे कॢप्तरेखमकथादिरेखया कोण
लक्षितहलक्षमंडलीभावलक्ष्यमबलालयं भजे २ तत्पुटे प्रकटदाडिम
प्रभास्पर्धमानमणिपाटलप्रभं चिंतयामि हृदि चिन्मयं वपुर्बिंदुनाद
मणिपीठमंडलं ३ ॥

पु॰ अंतस्त्रिकोणेषु लक्षितानां हलक्षाणां मंडलीभावेन लक्ष्यं लक्षणीयं २ त
त्पुटेति अहं हृदि मनसि चिन्मयं वपुश्चिंतयामि ज्ञानमयं शरीरं द्वादशशब्दरूप
मित्यर्थः तत्पुटे तस्य त्रिकोणस्य मध्ये संपुटे वपुः किंभूतं प्रकटदाडिमप्रभास्प
र्द्धमानमणिपाटलप्रभमुत्तम दाडिमकुसुमप्रभया उद्घाल्कपिलवर्णया स्पर्ध
माणानां सदृशानां मणीनां पाटलप्रभेव प्रभा यस्य तत्पुनः किंभूतं बिंदुनाद १
मणिपीठमंडलं यत्र तत् ३ ॥

ॐ र्ध्वमिति अस्यचिन्मयस्य नागभवबीजस्योर्ध्वे आदिहंसयोर्युगं अहंव्याचक्ष्यामि
आउ॰ पूर्वेमरचक्ष्यातोऽन्वितार्थः हंसइति अजपागायत्री ब्रह्मस्वरूपा चिन्मयासंन्या
सिनामुपास्येयं हंइतिशिवः सइतिशक्तिः एतांचादिसृष्टेः कारणत्वात् जीविनांप्रा
णहारिणीच हकारेणबहिर्याति सकारेणविशेत्पुनः सर्वेषांजीवरूपोहंसध्यायेः
द्धियानिश्चलं स्वात्मानंनिर्वातदीपनिभंयं हंसस्वरूपं बुधः इतिनागभट्टाः ब्रह्मस्था
नेतद्युगं ब्रह्मस्वरूपं प्रपंचव्यापकरूपत्वात् हकारसकारयोरोपसंधानिकशक्ति

ॐर्ध्वमस्यहुतभुक्शिखासखंतद्विलासपरिबृंहणास्पदं विश्वघ
स्मरमहोच्छिदोत्कटंव्याचक्ष्यामियुगमादिहंसयोः ५ ॥ ॥

त्वात् नित्यद्वित्वमेव यथास्तनयोर्युगमितिचंडी तत्पुनः किंभूतं हुतभुकशिखा
सखं हुतभुजोवन्हेः शिखायाःसखा हुतभुक्शिखासखं रात्राद्वित्वात् अग्नि
शिखातुल्यमित्यर्थः पुनः किंभूतं तद्विलासापरिबृंहणास्पदं तदनिर्वचनीय
विलासानामद्भुतकांतीनां बृंहणं वर्धनं तस्यास्पदं॰ स्थानं अत्यंतकांतीनांवर्धे
नस्थानमित्यर्थः पुनः किंभूतं विश्वघस्मरमहोच्छिदोत्कटं विश्वमेव घस्मरं
हेयत्वात् तस्यमहोच्छेदनं महोच्छिदआर्षत्वात् गुणाभावः तेनोत्कटअत्यंत
प्रपंचाभावादित्यर्थः ५ ॥

२ तत्रनाथेति तत्रहंसपीठे मुखमेकंतेषणमुखानि कार्त्तिकेयस्यषण्मुखप्रसा
१ वेतद्यक्तीकृतं नाथचरणारविंदयोर्द्वंद्वमर्थान् ममभानसं स्मरति चिंतयतीत्य
र्थः स्मृ चिंतायां नाथोगुरुः तयोः किंभूतयोः कुंकुमासवझरीकरंदयोः कुंकुम
मेवासवं· कुंकुमासवैं रक्तवर्णो परमामृतं तस्यझरिप्रवाहः सएवा करंदोमक
रंदः पुष्परसोययोः परमामृतस्यपुष्परसतुल्यत्वं करंदशब्दोमकरंदवाची
तिशिवोक्तत्वात् किंवाएकदेशान्वयः किंभूतंद्वंद्वं इंदुमकरंदशीतलं इंदोश्चंद्र

तत्रनाथचरणारविंदयोः कुंकुमासवझरीकरंदयोः द्वंद्वमिंदु
मकरंदशीतलं मानसंस्मरतिमंगलास्पदं ५ निषक्तमणिपादु
कानियमिताघकोलाहलं स्फुरत्किसलयारुणंनखसमुल्लसच्चं

स्यमकरंदः किरणामृतंतद्वच्छीतलं इंदुकरः कंदशीतलमितिपाठे चंद्रस्यकरः
किरणमेव कंदंमूलंतद्वत् शीतलं पुनः किंभूतं मंगलंमोक्षस्तस्यास्पदं मुक्तिस्था
नमित्यर्थः मुक्तिदमितियावत् ५ निषक्तमणिपादुकेति अहंगुरुपादारविंद
द्वंद्वंभजामि किंभूतं सिरसिस्थितं तत्स्थलक्षणया शिरसिस्थितचंद्रमंडले॥
एतदेवपंचमपादुकास्थानं किंभूतं निषक्तमणिपादुकानियमिताघकोलाहलं
आसक्ताभ्यां मणिपादुकाभ्यांनियमितोनिरस्तीकृत आघानांकोलाहलः कलक २
लोयत्र यद्वानिषक्तमणिपादुकामिति एथक्पदं पुनः किंभूतंस्फुरत्किसलयारुणं

स्फुरद्भिः किसलयैः पत्रैररुणैः किंवा स्फुरंति किसलयानि अरुणरागेनेत्यर्थः ॥
पद्मासनस्थितत्वात् चक्रमद्धिसहस्रदलपद्मं कमलं सुधावर्षिणं इतिपंचम
स्तवराजे पुनः किंभूतं नखसमुल्लसच्चंद्रकं नखैः समुल्लसन्समुल्लासयत् ॥
चंद्रोयेन अंतर्भावित इत्यर्थः हंसपीठेषोडशाकलापूर्णचंद्रमंडलेवा गुरोरेव।
स्थानात् नखएवसमुल्लसच्चंद्रइतिवापाठः पुनः किंभूतं परामृतसरोवरोदि
तसरोजसद्रोचिषं परामृतानां अत्यंतशुक्लानां सद्रोचिषं रक्तप्रकाशोयत्र त
दत्यंतशुक्लमित्यर्थः चंद्रशुक्लत्वादमृतस्यशुक्लत्वं तद्घटितत्वाच्चंद्रस्य ६॥

परामृतसरोवरोदितसरोजसद्रोचिषं भजामिशिरसिस्थितंगुरुपदा
रविंदद्वयं ६ पादुकापंचकस्तोत्रं पंचवक्त्राद्विनिर्गतं षडाम्नायक्र
मप्राप्तं प्रपंचेचातिदुर्लभम् ७ ॥ इतिजोगचिंतामणिसंपूर्णं ॥

स्तोत्रमिदंपंचवक्त्राद्विनिर्गतं शिवस्येत्यर्थः एतेन गायत्र्या अर्थो दर्शितः यथाच
तुर्वेदप्रस्तुतगायत्री महेश्वरवदनोत्पन्ना ब्रह्मस्वरूपा ब्रह्मविष्णुशिवप्रभृतीनां
प्रतिपादिका तथेदं स्तोत्रं ब्रह्मस्वरूपं सर्वप्रतिपादकं एतद्देवपंचवक्त्राद्विनि
र्गतं किंभूतं पादुकापंचकं पादुकायाः पंचस्थानानि यत्र तत् अर्थाद्गुरोः पु
नः किंभूतं षडाम्नायानां क्रमस्यप्राप्तंयत्र भावेक्तः केषडाम्नायाः तत्राह ॥
शिवस्यपंचवदनानि पूर्वदक्षिणपश्चिमोत्तरोर्ध्वस्थानानि पूर्वईशानम

२
स्थितमेकं मुखं तेन षण्मुखानि कार्त्तिके यस्य षण्मुखप्रस्तावे प्रकटीकृता
नि तदा सत्ययुगे शिवपार्वतीसंवादेऽपि के देवा धर्मनियमार्थदातारः कादेव्योध
र्मार्थकाममोक्षदात्र्यः तत्र शिवेन पश्चिममुखेन नारायणवैष्णवादि नारसिं
हवाराहप्रभृतयश्चतुर्वर्गदातारो मंत्राः कथिताः सोपायाः स पश्चिमाम्नायः।
दक्षिणमुखेन प्रासादादि दक्षिणामूर्त्तिप्रभृति चतुर्वर्गप्रदातारो मंत्राः सोपायाः
कथिताः स दक्षिणाम्नायः पूर्वमुखेन भुवनेश्वरी अन्नपूर्णा महालक्ष्मी सरस्व
ती प्रभृतीनां विद्याः सोपायाः कथिताः स पूर्वाम्नायः उत्तरमुखेन काली तारा म
हिषमर्द्दिनी त्वरिता जयदुर्गादि शक्ति प्रभृतीनां विद्याः सोपाध्यायाः कथिताः।।
चतुर्वर्गप्रदातारः स उत्तराम्नायः ऊर्ध्वमुखेन त्रिपुरेण महात्रिपुरभैरवी त्रिपु
रसुंदरी प्रभृतीनां विद्याः कथिताः स ऊर्ध्वाम्नायः ईशानमुखे सर्वमंत्रविद्यास्था
नानि सन्ति मालानेवद्यादिमंत्रविद्याभेदाः कथिताः स ईशानाम्नायः एते षडाम्नायाः
कथिताः तेषां यानि फलानि तेषां प्राप्तं स्तोत्रे स्मिन् पुनः किंभूतं प्रपंच आब्रह्मस्तं
बपर्यंतं चतुर्दशभुवनेऽपि दुर्लभं यदुक्तं द्वापरादौ युगे कल्पे कलया मानुषादिषु आ
गमैः कल्पितैर्वत्स जनान्मद्विमुखान्कुरु अस्यार्थः द्वापरादौ द्वापरसमीपे कलि
युगे आदिशब्दोऽत्र समीपवाची द्वापरस्यावसाने युगे तु श्रीकृष्णानुमत्या पूर्वा
म्नाय उक्तः भुवनेश्वरी मंत्रस्य धनंजयोपासितत्वात् मानुषादिषु कलौ कलया।
शेन उन्मत्तो भूत्वा तेनोयकादि सिद्धिप्रपंचभूतडमरादिरूपैरागमैः कल्पितैर्वत्स
जनान्मद्विमुखान्कुरु अन्यथा पश्चिमाम्नायोक्तक्रमेण गोतमी यसनत्कुमारी
यत्तत्र प्रतिपादितोपासनावाधाप्रतिपत्तिः स्यात् तेनोत्तरोत्तरास्तृषिः स्यादिति।
श्रीकृष्णार्पणमस्तु लिखितं जवाहरगिरस्येदं पुस्तकं श्रीराम जयराम ७।। २.